श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचितम्

# ॥ श्रीनङ्कैनल्लूर् हयग्रीवसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनङ्गैनल्लूर् हयग्रीवसुप्रभातम् ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

यामिन्यपैति हयवक्त्र ! विमुञ्च निद्राम्
उन्मेषमृच्छतु तवोन्मिषितेन विश्वम्।
योषासुपत्तनमिदं ह्यवृणोर्निवासं
कर्तुं जनस्य निखिलस्य हि सुप्रभातम् ॥ 1 ॥

सुखाय सुप्रातरिदं तवास्तु
जगत्पते जागृहि वाजिवक्त्र !।
अम्भोजमन्तश्शयमञ्जुतार -
लोलम्बमुन्मीलतु लोचनं ते ॥ 2 ॥

एवं स्वकीययदुनाथपरप्रभात -
सूक्तिं पठन् निगममौलिगुरुस्समिन्धे।
व्यावृत्य देव भवतोऽभिमुखीं च कृत्वा
पार्श्वे तवाऽत्र वदने हय ! सुप्रभातम् ॥ 3 ॥

आश्रावयन्त्यभिनतस्वजनार्थवादान्
अङ्कं श्रिताऽसि करुणामयविग्रहे ! श्रीः !।
हंसस्य हेमधरणीधरपार्श्वभूमिं
हंसीव काचन रमे ! तव सुप्रभातम् ॥ 4 ॥

योषासुपत्तनपुरालयनित्यवासिन् !
    दोषाकरे कृतनिवास ! तथाऽपि शुद्ध !।
भाषाभिवन्दितपदाब्जयुगेश ! वेदान्
    हेषामिषेण वितरन् ! भज सुप्रभातम्॥ 5॥

कर्णोद्भवौ जलशयस्य पुरा तवाऽऽस्तां
    दैत्यौ तु वेदमखिलं विधितो हरन्तौ।
सुप्ते त्वयीश बहवोऽद्य कलौ तदर्थान्
    तद्वाजिवक्त्र ! सहसा भज सुप्रभातम्॥ 6॥

त्वत्पादपद्मयुगले प्रणतीर्विधाय
    सर्वस्य मूर्ध्नि लिपिलेखनमेष कर्तुम्।
सज्जो विधिः पुर इहास्ति सभक्ति नाथ !
    त्वां सेविता हय ! मुखे तव सुप्रभातम्॥ 7॥

आचार्यदिव्यभवनेऽत्वतिमात्रभक्तिः
    चान्द्रीं कलां शिरसि धूर्जटिरादधानः।
सर्वज्ञ एष धृतदक्षिणरम्यमूर्तिः
    त्वां सेविता हय ! मुखे तव सुप्रभातम्॥ 8॥

त्वामेव चित्तगतमेष सदा विधाय
    त्वद्रूप एव सविता हयवक्त्र ! योऽदात्।
शुक्लं यजुर्मुनिवरस्य निजैः करैस्स
    त्वन्मन्दिरं स्पृशति खात्तव सुप्रभातम्॥ 9॥

एषा कथा भुवि कृता वितता मयेति
    प्राप्य प्रमोदमयमेति पराशरोऽपि।
पारम्यवित् तव विभो ! महतोः प्रसादात्
    त्वां सेविता हय ! मुखे तव सुप्रभातम्॥ 10॥

श्रीवाजिमेधबलतो यदहं कवीशः
त्वाद्यं तथा चरममप्यथ काण्डमिद्धम्।
श्रीवाजिमेधचरितेन कृतं मयेति
वाल्मीकिरेति भगवन्! तव सुप्रभातम्॥ **11**॥

देव! त्वदीयचरितं कथयन् क्वचित्तु
कोणे महाकलहपुस्तक एष भेजे।
व्यासत्वमित्यथ कृतज्ञ इहैष भाति
त्वां सेविता हय! मुखे तव सुप्रभातम्॥ **12**॥

मत्स्याश्वकच्छप इति प्रथितावतारान्
संवर्णयन् तव गुणेषु सदा रतोऽसौ।
श्रीकीरयोगिवर एष विभाति नाथ!
त्वां सेविता हय! मुखे तव सुप्रभातम्॥ **13**॥

श्रीकारिजः क्वचिदहो फणितो मयाऽऽसीत्
अर्चापरः परमसौ मम शिष्यभूतः।
संयग्जगाद कलिवैरिरितीह तेन
त्वां सेविता हय! मुखे तव सुप्रभातम्॥ **14**॥

तालेन वेदमनघं द्रमिडे सुरम्यं
श्रीभागिनेयसहितो भवतेऽत्र गायन्।
श्रीरङ्गनाथमुनिरेष विभाति देव!
त्वां सेविता हय! मुखे तव सुप्रभातम्॥ **15**॥

आदौ भवन्तमनघं मधुजित्पदेन
स्पृष्ट्वा यदाह भगवन्! किल रत्नमेतत्।
स्तोत्रं मदीयमिति यामुन एष भक्त्या
त्वां सेविता हय! मुखे तव सुप्रभातम्॥ **16**॥

श्रीभाष्यमेतदिह मे किल भाष्यमाह
    या शारदा तव पदाम्बुजभक्तिपूर्णा।
सर्वं प्रभो ! तव कृपेति वदन् यतीशः
    त्वां सेविता हय ! मुखे तव सुप्रभातम्॥ **17**॥

श्रीतार्क्ष्यवाहनचरो विदुषां विधेश्च
    दातेष्टमित्यपि नमन् हयवक्त्र ! तं त्वाम्।
भावं पराशरगिरां प्रपठन् स एति
    श्रीविष्णुचित्तगुरुराट् तव सुप्रभातम्॥ **18**॥

श्रीरङ्गनाथसविधे स पराशरार्यः
    देव्याः दृशोरसमतां तव यो जगाद।
योषित्सुपत्तनपुरे भवतः कटाक्षं
    तं सेविता हय ! मुखे तव सुप्रभातम्॥ **19**॥

श्रीभाष्यगोरससुधे महिते च देव !
    श्रीवत्सवंश्यगुरुराडिह तेऽपि दातुम्।
काञ्चीपुरे व वरदस्य पुरोऽत्र भाति
    त्वां चिन्तयन् हय ! मुखे तव सुप्रभातम्॥ **20**॥

गोष्ठी परा तव विभूतिरता समेता
    घोषश्च देव ! तव कीर्तिपरोऽथ तस्याः।
प्राप्तप्रवालधरवैद्युतयानघोषैः
    मिश्रश्श्रुतौ हय ! मुखे तव सुप्रभातम्॥ **21**॥

सन्ध्याकाले विशुद्धा द्विजवरपरिषत् वाजिनं संस्मरन्ती
    केश्यश्वस्याथ जिष्णुं सुरभिमतिऋचा सौरभं नैजवक्त्रे।
वाञ्छन्ती वेदमूर्ते ! हयमुख ! तव सा संमुखीनाऽधुनेयं
    प्रत्यक्षं द्रष्टुमश्वं तमिव सपदि हे ! तद्व्रजेस्सुप्रभातम्॥ **22**॥

भूराद्यास्सप्त सर्वे द्विजकुलजनिता व्याहृतीस्सञ्जपन्तः
प्राणायामे चतुर्थ्या मह इति भगवन् ! व्याहृतेर्लक्ष्यभूतम्।
वागीशं त्वां भजन्तस्तदिह च पुरतो द्रष्टुकामास्समेताः
साक्षात् योषित्सुपुर्यां हयवदन ! विभो ! तद्भजेस्सुप्रभातम्॥ **23** ॥

योषित्सत्पुरवास ! वाजिवदन ! श्रीचन्द्रबिम्बे स्थित !
लक्ष्मीमङ्कगतां दधान ! भगवन् ! श्वेताद्रितुल्याकृते !।
वेदार्थादिसुरक्षणाय कलितस्वीयावतार ! प्रभो !
वेदार्थावनसत्सभाजनमुखात्सूषागिरस्स्वीकुरु॥ **24** ॥

योषित्सत्पुरवासिनं द्विजपतेस्सन्मण्डलालङ्कृतिं
स्त्रीरत्नोदयभूमिजुष्टदयितं गन्धर्वदिव्याननम्।
तेन श्रीनिधिराघवार्यवपुषा संशिक्षितो बालकः
तुष्टावेति मुखे दिनस्य पठतां स्यात् सुप्रभातं सदा॥ **25** ॥

॥ इति श्रीनङ्गैनल्लूर् हयग्रीवसुप्रभातं समाप्तम्॥